# mahAkAlabhairavAShTakam

# મહાકાલભૈરવાષ્ટકમ્ અથવા તીક્ષ્ણદંષ્ટ્રકાલભૈરવાષ્ટકમ્

## Document Information

Text title : mahAkAlabhairavAShTakam

File name : mahAkAlabhairavAShTakam.itx

Category : aShTaka, shiva, bIjAdyAkSharamantrAtmaka

Location : doc_shiva

Proofread by : Sunder Hattangari Ruma Dewan

Latest update : June 5, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 22, 2023

*sanskritdocuments.org*

# મહાકાલભૈરવાષ્ટકમ્ અથવા તીક્ષ્ણદંષ્ટ્રકાલભૈરવાષ્ટકમ્

ॐ

યં યં યં યક્ષરૂપં દશદિશિવિદિતં ભૂમિકમ્પાયમાનં
 સં સં સંહારમૂર્તિં શિરમુકુટજટા શેખરં ચન્દ્રબિમ્બમ્ ।
દં દં દં દીર્ઘકાયં વિકૃતનખમુખં ચોર્ધ્વરોમંકરાલં
 પં પં પં પાપનાશં પ્રણમત સતતં ભૈરવં ક્ષેત્રપાલમ્ ॥ ૧॥

રં રં રં રક્તવર્ણં કટિકટિતતનું તીક્ષ્ણદંષ્ટ્રાકરાલં
 ઘં ઘં ઘં ઘોષ ઘોષં ઘ ઘ ઘ ઘ ઘટિતં ઘર્ઝરં ઘોરનાદમ્ ।
કં કં કં કાલપાશં ધ્રુક્ધ્રુક્ધ્રુકિતં જ્વાલિતં કામદાહં ( var  કં કં કઙ્કાલપાશં)
 તં તં તં દિવ્યદેહં પ્રણમત સતતં ભૈરવં ક્ષેત્રપાલમ્ ॥ ૨॥ ( var  દં દં દં)

લં લં લં લમ્બદન્તં લ લ લ લ લલિતં દીર્ઘજિહ્વાકરાલં
 ધૂં ધૂં ધૂં ધૂમ્રવર્ણં સ્ફુટવિકટમુખં ભાસ્કરં ભીમરૂપમ્ ।
રું રું રું રુણ્ડમાલં રવિતમનિયતં તામ્રનેત્રં કરાલં
 નં નં નં નગ્નભૂષં પ્રણમત સતતં ભૈરવં ક્ષેત્રપાલમ્ ॥ ૩॥

વં વં વં વાયુવેગં નતજનસદયં બ્રહ્મસારં પરન્તં
 ખં ખં ખં ખડ્ગહસ્તં ત્રિભુવનવિલયં ભાસ્કરં ભીમરૂપમ્ ।
ચં ચં ચં ચં ચલિત્વાઽચલ ચલ ચલિતા ચાલિતં ભૂમિચક્રં
 મં મં મં માયિરૂપં પ્રણમત સતતં ભૈરવં ક્ષેત્રપાલમ્ ॥ ૪॥

શં શં શં શઙ્ખહસ્તં શશિકરધવલં મોક્ષસમ્પૂર્ણતેજં
 મં મં મં મં મહાન્તં કુલમકુલકુલં મન્ત્રગુપ્તં સુનિત્યમ્ ।
યં યં યં ભૂતનાથં કિલિકિલિકિલિતં બાલકેલિપ્રધાનં
 અં અં અં અન્તરિક્ષં  પ્રણમત સતતં ભૈરવં ક્ષેત્રપાલમ્ ॥ ૫॥

ખં ખં ખં ખડ્ગભેદં વિષમમૃતમયં કાલકાલં કરાલં
 ક્ષં ક્ષં ક્ષં ક્ષિપ્રવેગં દહદહદહનં તપ્તસન્દીપ્યમાનમ્ ।
હૂં હૂં હૂંકારનાદં પ્રકટિતગહનં ગર્જિતૈર્ભૂમિકમ્પં ( var  હં હં હઙ્કારનાદમ્)

બં બં બં બાલલીલં પ્રણમત સતતં ભૈરવં ક્ષેત્રપાલમ્ ॥ ૬॥

સં સં સં સિદ્ધિયોગં સકલગુણમખં દેવદેવં પ્રસન્નં
પં પં પં પદ્મનાભં હરિહરમયનં ચન્દ્રસૂર્યાગ્નિનેત્રમ્ ।
ઐં ઐં ઐશ્વર્યનાથં સતતભયહરં પૂર્વદેવસ્વરૂપં
રૌં રૌં રૌં રૌદ્રરૂપં પ્રણમત સતતં ભૈરવં ક્ષેત્રપાલમ્ ॥ ૭॥

હં હં હં હંસયાનં હસિતકલહકં મુક્તયોગાટ્ટહાસં
ધં ધં ધં નેત્રરૂપં શિરમુકુટજટાબન્ધબન્ધાગ્રહસ્તમ્ ।
ટં ટં ટઙ્કારનાદં ત્રિદશલટલટં કામગર્વાપહારં
ભ્રૂં ભ્રૂં ભ્રૂં ભૂતનાથં પ્રણમત સતતં ભૈરવં ક્ષેત્રપાલમ્ ॥ ૮॥

ભૈરવાષ્ટકમિદં પુણ્યં ષણ્માસં યઃ પઠેન્નરઃ ।
સ યાતિ પરમં સ્થાનં યત્ર દેહો મહેશ્વરઃ ॥

ઇતિ મહાકાલભૈરવાષ્ટકં સમ્પૂર્ણમ્ ।
શ્રીક્ષેત્રપાલભૈરવાષ્ટકમ્

નમો ભૂતનાથં નમઃ પ્રેતનાથં
નમઃ કાલકાલં નમઃ રુદ્રમાલમ્ ।
નમઃ કાલિકાપ્રેમલોલં કરાલં
નમો ભૈરવં કાશિકાક્ષેત્રપાલમ્ ॥

Variations પાઠભેદ are indicated as var and
there may still be variations in the print.

Proofread by Sunder Hattangari, Ruma Dewan

*mahAkAlabhairavAShTakam*
pdf was typeset on July 22, 2023

Please send corrections to *sanskrit@cheerful.com*